श्री हरि स्तुतिः (हरिमीडे स्तोत्रं)

श्री हरि स्तुतिः (हरिमीडे स्तोत्रं)

स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं
यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थं |
यस्मिन् दृष्टे नश्यति तत्संसृतिचक्रं
तं संसारध्वांतविनाशं हरिमीडे || 1 ||

यस्यैकांशादित्थमशेषं जगदेतत्
प्रादुर्भूतं येन पिनद्धं पुनरित्थं |
येन व्याप्तं येन विबुद्धं सुखदुःखै-
-स्तं संसारध्वांतविनाशं हरिमीडे || 2 ||

सर्वज्ञो यो यश्च हि सर्वः सकलो यो
यश्चानंदोऽनंतगुणो यो गुणधामा |
यश्चाव्यक्तो व्यस्तसमस्तः सदसद्य-
-स्तं संसारध्वांतविनाशं हरिमीडे || 3 ||

यस्मादन्यन्नास्त्यपि नैवं परमार्थं
दृश्यादन्यो निर्विषयज्ञानमयत्वात् |
ज्ञातृज्ञानज्ञेयविहीनोऽपि सदा ज्ञ-
-स्तं संसारध्वांतविनाशं हरिमीडे || 4 ||

आचार्येभ्यो लब्धसुसूक्ष्माच्युततत्त्वा
वैराग्येणाभ्यासबलाच्चैव द्रढिम्ना |
भक्त्यैकाग्र्यध्यानपरा यं विदुरीशं
तं संसारध्वांतविनाशं हरिमीडे || 5 ||

प्राणानायम्योमिति चित्तं हृदि रुद्ध्वा
नान्यत् स्मृत्वा तत्पुनरत्रैव विलाप्य |
क्षीणे चित्ते भादृशिरस्मीति विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 6 ||

यं ब्रह्माख्यं देवमनन्यं परिपूर्णं
हृत्स्थं भक्तैर्लभ्यमजं सूक्ष्ममतर्क्यं |
ध्यात्वात्मस्थं ब्रह्मविदो यं विदुरीशं
तं संसारध्वांतविनाशं हरिमीडे || 7 ||

मात्रातीतं स्वात्मविकासात्मविबोधं
ज्ञेयातीतं ज्ञानमयं हृद्युपलभ्यं |
भावग्राह्यानंदमनन्यं च विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 8 ||

यद्यद्वेद्यं वस्तुसतत्त्वं विषयाख्यं
तत्तद्ब्रह्मैवेति विदित्वा तदहं च |
ध्यायंत्येवं यं सनकाद्या मुनयोऽजं
तं संसारध्वांतविनाशं हरिमीडे || 9 ||

यद्यद्वेद्यं तत्तदहं नेति विहाय
स्वात्मज्योतिर्ज्ञानमयानंदमवाप्य |
तस्मिन्नस्मीत्यात्मविदो यं विदुरीशं
तं संसारध्वांतविनाशं हरिमीडे || 10 ||

हित्वाहित्वा दृश्यमशेषं सविकल्पं
मत्वा शिष्टं भादृशिमात्रं गगनाभं |
त्यक्त्वा देहं यं प्रविशंत्यच्युतभक्ता-
-स्तं संसारध्वांतविनाशं हरिमीडे || 11 ||

सर्वत्रास्ते सर्वशरीरी न च सर्वः
सर्वं वेत्त्येवेह न यं वेत्ति च सर्वः |
सर्वत्रांतर्यामितयेत्थं यमयन्य-
-स्तं संसारध्वांतविनाशं हरिमीडे || 12 ||

सर्वं दृष्ट्वा स्वात्मनि युक्त्या जगदेत-
-द्दृष्ट्वात्मानं चैवमजं सर्वजनेषु |
सर्वात्मैकोऽस्मीति विदुर्यं जनहृत्स्थं
तं संसारध्वांतविनाशं हरिमीडे || 13 ||

सर्वत्रैकः पश्यति जिघ्रत्यथ भुंक्ते
स्प्रष्टा श्रोता बुध्यति चेत्याहुरिमं यं |
साक्षी चास्ते कर्तृषु पश्यन्निति चान्ये
तं संसारध्वांतविनाशं हरिमीडे || 14 ||

पश्यन् शृण्वन्नत्र विजानन्नसयन्सं-
-जिघ्रद्बिभ्रद्देहमिमं जीवतयेत्थं |
इत्यात्मानं यं विदुरीशं विषयज्ञं
तं संसारध्वांतविनाशं हरिमीडे || 15 ||

जाग्रद्दृष्ट्वा स्थूलपदार्थानथ मायां
दृष्ट्वा स्वप्नेऽथापि सुषुप्तौ सुखनिद्रां |
इत्यात्मानं वीक्ष्य मुदास्ते च तुरीये
तं संसारध्वांतविनाशं हरिमीडे || 16 ||

पश्यन् शुद्धोऽप्यक्षर एको गुणभेदा-
-न्नानाकारान् स्फाटिकवद्भाति विचित्रः |
भिन्नश्छिन्नश्चायमजः कर्मफलैर्य-
-स्तं संसारध्वांतविनाशं हरिमीडे || 17 ||

ब्रह्मा विष्णू रुद्रहुताशौ रविचंद्रा-
-विंद्रो वायुर्यज्ञ इतीत्थं परिकल्प्य |
एकं संतं यं बहुधाहुर्मतिभेदा-
-त्तं संसारध्वांतविनाशं हरिमीडे || 18 ||

सत्यं ज्ञानं शुद्धमनंतं व्यतिरिक्तं
शांतं गूढं निष्कलमानंदमनन्यं |
इत्याहादौ यं वरुणोऽसौ भृगवेऽजं
तं संसारध्वांतविनाशं हरिमीडे || 19 ||

कोशानेतान् पंचरसादीनतिहाय
ब्रह्मास्मीति स्वात्मनि निश्चित्य दृशिस्थं |
पित्रा शिष्टो वेद भृगुर्यं यजुरंते
तं संसारध्वांतविनाशं हरिमीडे || 20 ||

येनाविष्टो यस्य च शक्त्या यदधीनः
क्षेत्रज्ञोऽयं कारयिता जंतुषु कर्तुः |
कर्ता भोक्तात्मात्र हि यच्छक्त्यधिरूढ-
-स्तं संसारध्वांतविनाशं हरिमीडे || 21 ||

सृष्ट्वा सर्वं स्वात्मतयैवेत्थमतर्क्यं
व्याप्याथांतः कृत्स्नमिदं सृष्टमशेषं |
सच्च त्यच्चाभूत्परमात्मा स य एक-
-स्तं संसारध्वांतविनाशं हरिमीडे || 22 ||

वेदांतैश्चाध्यात्मिकशास्त्रैश्च पुराणैः
शास्त्रैश्चान्यैः सात्त्वततंत्रैश्च यमीशं |
दृष्ट्वाथांतश्चेतसि बुद्ध्वा विविशुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 23 ||

श्रद्धाभक्तिध्यानशमाद्यैर्यतमानै-
-र्ज्ञातुं शक्यो देव इहैवाशु य ईशः |
दुर्विज्ञेयो जन्मशतैश्चापि विना तै-
-स्तं संसारध्वांतविनाशं हरिमीडे || 24 ||

यस्यातर्क्यं स्वात्मविभूतेः परमार्थं
सर्वं खल्वित्यत्र निरुक्तं श्रुतिविद्भिः |
तज्जातित्वादब्धितरंगाभमभिन्नं
तं संसारध्वांतविनाशं हरिमीडे || 25 ||

दृष्ट्वा गीतास्वक्षरतत्त्वं विधिनाजं
भक्त्या गुर्व्या लभ्य हृदिस्थं दृशिमात्रं |
ध्यात्वा तस्मिन्नस्म्यहमित्यत्र विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 26 ||

क्षेत्रज्ञत्वं प्राप्य विभुः पंचमुखैर्यो
भुंक्तेऽजस्रं भोग्यपदार्थान् प्रकृतिस्थः |
क्षेत्रे क्षेत्रेऽप्स्विंदुवदेको बहुधास्ते
तं संसारध्वांतविनाशं हरिमीडे || 27 ||

युक्त्यालोड्य व्यासवचांस्यत्र हि लभ्यः
क्षेत्रक्षेत्रज्ञांतरविद्भिः पुरुषाख्यः |
योऽहं सोऽसौ सोऽस्म्यहमेवेति विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 28 ||

एकीकृत्यानेकशरीरस्थमिमं ज्ञं
यं विज्ञायेहैव स एवाशु भवंति |
यस्मिंल्लीना नेह पुनर्जन्म लभंते
तं संसारध्वांतविनाशं हरिमीडे || 29 ||

द्वंद्वैकत्वं यच्च मधुब्राह्मणवाक्यैः
कृत्वा शक्रोपासनमासाद्य विभूत्या |
योऽसौ सोऽहं सोऽस्म्यहमेवेति विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 30 ||

योऽयं देहे चेष्टयिताऽंतःकरणस्थः
सूर्ये चासौ तापयिता सोऽस्म्यहमेव |
इत्यात्मैक्योपासनया यं विदुरीशं
तं संसारध्वांतविनाशं हरिमीडे || 31 ||

विज्ञानांशो यस्य सतः शक्त्यधिरूढो
बुद्धिर्बुध्यत्यत्र बहिर्बोध्यपदार्थान् |
नैवांतःस्थं बुध्यति यं बोधयितारं
तं संसारध्वांतविनाशं हरिमीडे || 32 ||

कोऽयं देहे देव इतीत्थं सुविचार्य
ज्ञाता श्रोता मंतयिता चैष हि देवः |
इत्यालोच्य ज्ञांश इहास्मीति विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 33 ||

को ह्येवान्यादात्मनि न स्यादयमेष
ह्येवानंदः प्राणिति चापानिति चेति |
इत्यस्तित्वं वक्त्युपपत्त्या श्रुतिरेषा
तं संसारध्वांतविनाशं हरिमीडे || 34 ||

प्राणो वाऽहं वाक्छ्रवणादीनि मनो वा
बुद्धिर्वाहं व्यस्त उताहोऽपि समस्तः |
इत्यालोच्य ज्ञप्तिरिहास्मीति विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 35 ||

नाहं प्राणो नैव शरीरं न मनोऽहं
नाहं बुद्धिर्नाहमहंकारधियौ च |
योऽत्र ज्ञांशः सोऽस्म्यहमेवेति विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 36 ||

सत्तामात्रं केवलविज्ञानमजं स-
-त्सूक्ष्मं नित्यं तत्त्वमसीत्यात्मसुताय |
साम्नामंते प्राह पिता यं विभुमाद्यं
तं संसारध्वांतविनाशं हरिमीडे || 37 ||

मूर्तामूर्ते पूर्वमपोह्याथ समाधौ
दृश्यं सर्वं नेति च नेतीति विहाय |
चैतन्यांशे स्वात्मनि संतं च विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 38 ||

ओतं प्रोतं यत्र च सर्वं गगनांतं
योऽस्थूलानण्वादिषु सिद्धोऽक्षरसंज्ञः |
ज्ञातातोऽन्यो नेत्युपलभ्यो न च वेद्य-
-स्तं संसारध्वांतविनाशं हरिमीडे || 39 ||

तावत्सर्वं सत्यमिवाभाति यदेत-
-द्यावत्सोऽस्मीत्यात्मनि यो ज्ञो न हि दृष्टः |
दृष्टे यस्मिन् सर्वमसत्यं भवतीदं
तं संसारध्वांतविनाशं हरिमीडे || 40 ||

रागामुक्तं लोहयुतं हेम यथाग्नौ
योगाष्टांगैरुज्ज्वलितज्ञानमयाग्नौ |
दग्ध्वात्मानं ज्ञं परिशिष्टं च विदुर्यं
तं संसारध्वांतविनाशं हरिमीडे || 41 ||

यं विज्ञानज्योतिषमाद्यं सुविभांतं
हृद्यर्केंद्वग्न्योकसमीड्यं तटिदाभं |
भक्त्याराध्येहैव विशंत्यात्मनि संतं
तं संसारध्वांतविनाशं हरिमीडे || 42 ||

पायाद्भक्तं स्वात्मनि संतं पुरुषं यो
भक्त्या स्तौतीत्यांगिरसं विष्णुरिमं मां |
इत्यात्मानं स्वात्मनि संहृत्य सदैक-
-स्तं संसारध्वांतविनाशं हरिमीडे || 43 ||

अधिकश्लोकः –
इत्थं स्तोत्रं भक्तजनेड्यं भवभीति-
-ध्वांतार्काभं भगवत्पादीयमिदं यः |
विष्णोर्लोकं पठति शृणोति व्रजति ज्ञो
ज्ञानं ज्ञेयं स्वात्मनि चाप्नोति मनुष्यः || 44 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्री हरि स्तुतिः संपूर्णं |